# ॥ श्रीनृसिंहकृत शरभेश्वर अष्टोत्तरशतनाम स्तोत्रम् ॥

श्रीनृसिंहोवाच

नमो रुद्राय शर्वाय महाग्रासाय विष्णवे ।

नम उग्राय भीमाय नमः क्रोधाय मन्यवे ॥

नमो भवाय सर्वाय शङ्कराय शिवाय ते ।

कालकालाय कालाय महाकालाय मृत्यवे ॥

वीराय वीरभद्राय क्षयद्वीराय शूलिने ।

महादेवाय महते पशूनां पतये नमः ॥

एकाय नीलकण्ठाय श्रीकण्ठाय पिनाकिने ।

नमोऽनन्ताय सूक्ष्माय नमस्ते मृत्युमृत्यवे ॥

पराय परमेशाय परात्परतराय ते ।

परात्पराय विश्वाय नमस्ते विश्वमूर्तये ॥

नमो विष्णुकलत्राय विष्णुक्षेत्राय भानवे ।

कैवर्ताय किराताय महाव्याधाय शाश्वते ॥

भैरवाय शरण्याय महाभैरवरूपिणे ।

नमो नृसिंहसंहर्त्रे कामकालपुरारये ॥

महापापौघसम्हर्त्रे विष्णुमायान्तकारिणे ।

त्र्यम्बकाय त्र्यक्षराय शिपिविष्टाय मीढुषे ॥

मृत्युञ्जयाय साम्बाय सर्वज्ञाय मखारये ।

मखेशाय वरेण्याय नमस्ते वह्निरूपिणे ॥

महाघ्राणाय जिह्वाय प्राणापानप्रवर्तिने ।

त्रिगुणाय त्रिशूलाय गुणातीताय योगिने ॥

सुरेशाय प्रवाहाय महायन्त्रप्रवर्तिने ।

नमश्चन्द्राग्निसूर्याय मुक्तिवैचित्र्यहेतवे ॥

वरदायावताराय सर्वकारणहेतवे ।

कपालिने करालाय पतये पुण्यकीर्तये ॥

अमोघायाग्निनेत्राय लकुलीशाय शम्भवे ।

भिषक्तमाय मुण्डाय दण्डिने योगरूपिणे ॥

मेघवाहाय देवाय पार्वतीपतये नमः ।

अव्यक्ताय विशोकाय स्थिराय स्थिरधन्विने ॥

स्थाणवे कृत्तिवासाय नमः पञ्चार्थहेतवे ।

वरदायैकपादाय नमश्चन्द्रार्धमौळये ॥

नमस्तेऽध्वरराजाय वयसां पतये नमः ।

योगीश्वराय नित्याय सत्याय परमेष्ठिने ॥

सर्वात्मने नमस्तुभ्यं नमः सर्वेश्वराय ते ।

एक द्वि त्रि चतुः पञ्च कृत्वस्तेऽस्तु नमो नमः ॥

दशकृत्वस्तु साहस्र कृत्वस्तेऽस्तु नमो नमः ।

नमो परिमितं कृत्वोऽनन्तकृत्वोन्नमो नमः ॥

नमो नमो नमो भूयः पुनर्भूयो नमो नमः ।

सूत उवाच

नाम्नामष्टशतेनैवं स्तुत्वामृतमयेन तु ।

पुनस्तु प्रार्थयामास नृसिंहः शरभेश्वरम् ॥

॥ शरभेशार्पणमस्तु ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]